National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 308-312
© 2025 NJHSR
www.sanskritarticle.com

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# अध्ययनविध्यर्थविमर्शः

**प्रो. प्रभाकरप्रसादः**

**स्वाध्यायैकप्रवेद्याय ब्रह्मणे परमात्मने।**
**सच्चिदानन्दरूपाय नमः स्वाभीष्टसिद्धये।।**

धर्मार्थकाममोक्षाणामाकरो वेदो नित्योऽपौरुषेयश्चेति वैदिकानां मीमांसकानां घण्टाघोषः प्रसिद्ध एव। तस्याध्ययनं नित्येनाध्ययनविधिनैव विधीयते, अन्यथाध्ययने नियतप्रवृत्तिर्न स्यात्, न स्याच्चानध्ययने प्रत्यवायः।[1] वेदाध्ययनस्य काम्यत्वे हि अर्थावबोधे सति कामना, कामनायां सत्यामध्ययन-प्रवृत्तस्यार्थावबोध इति परस्पराश्रयता स्यात्।

अतः अध्ययनविधिः कः? तेन किमर्थं किं विधीयते इति किञ्चिद्विचार्यते। **"स्वाध्यायोऽध्येतव्य:"**[2] अयमध्ययनविधिः तैत्तिरीयशाखायां श्रुतः। **"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"** इदं वाक्यञ्च महाभाष्येऽध्ययनविधायकं वाक्यमुद्धृतम्। न च वाक्यद्वयं निरर्थकम् इति वाच्यम्; प्रथमेनाध्ययनं विधीयते द्वितीयेन च तस्य निष्कारणकत्वेन नित्यत्वं विधीयत इति पौनरुक्त्यभावात्। शाखाभेदेन विधिभेदाद्वेति न दोषः।

स्वाध्यायोऽध्येतव्य इत्यत्र पदद्वयम्, स्वाध्यायः अध्येतव्यश्चेति। स्वाध्यायो नाम वेदः; अध्युपसर्गकेङ्धातोः **"इङश्च"** इति सूत्रेण घञि निष्पन्नः स्वाध्यायशब्दः आम्नायशब्दवद् वेदवाचकः। अधीयत इत्यध्यायः, स्वश्चासावध्यायश्चेति स्वाध्यायः स्वशाखेत्यर्थः। अध्येतव्य इत्यत्राध्ययनं विधीयते। अध्ययनं त्रिविधम्- ग्रहणाध्ययनम्, धारणाध्ययनम्, जपाध्ययनञ्चेति।

अत्र "स्वाध्यायोऽध्येतव्य" इत्यत्र ग्रहणाध्ययनमाद्यं विधीयते। अत्र षट् पक्षाः सन्ति-

१. अर्थज्ञानरूपदृष्टप्रयोजनाय अध्ययनं विधीयत इति न्यायमालाकाराणां वार्तिककाराणां भाष्यकाराणां मतत्वेन प्रसिद्धः पक्षः। शाङ्करवेदान्ते भामतीकारैः श्रीवाचस्पतिमित्रैरपि समर्थितः।

२. स्वाधीनोच्चारणक्षमत्वरूपाक्षरग्रहणार्थमध्ययनं विधीयत इति सायणाचार्याणाम्, अध्वरमीमांसा-कुतूहलवृत्तिकाराणां शाङ्करवेदान्ते विवरणाचार्याणाम्, श्रीभाष्यकाराणाञ्च पक्षः।

३. अक्षरग्रहणपरम्परयोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते, नियमफलन्तु त्रैवर्णिकानामेवा-धिकारः न तु शूद्राणामित्यधिकारनियमसिद्धिरेवेति शास्त्रदीपिकाकाराणां पक्षः।

४. फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायतया स्वाध्यायोध्येतव्य इति प्रत्यक्षश्रुत्याध्ययनं विधीयत इत्यपूर्वविधिरेव सन् उपायान्तरप्रतिक्षेपान्नियमः फलतीति सिद्धान्तचन्द्रिकाकाराणां पक्षः।

५. **"अष्टवर्ष ब्राह्मणमुपनयीत तमध्यापयीत"** इति साक्षाच्छ्रुताध्यापनविधिप्रयुक्तं वेदाध्ययनम्, न तु स्वविधिप्रयुक्तमिति श्रीप्रभाकरमिश्राणां पक्षः।

६. उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।

**"सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।"** इति स्मरणानुमितः **"शिष्यमुपनीय वेदाध्यापनेनाचार्यकं भावयेद्"** इत्येवं रूपस्याचार्यकरणविधेः प्रयुक्तमध्ययनमिति शालिकनाथमिश्राणां पक्षः।

सम्प्रति एतेषां पक्षाणां विवेचनपूर्वकं मतभेदे को हेतुरित्यपि विविच्यते।

अर्थज्ञानरूपदृष्टप्रयोजनायाध्ययनं विधीयत इति प्रथमपक्षे अयमाशयः- अध्येतव्य इत्यत्र विधौ कर्मणि तव्यप्रत्ययः। कर्म च चतुर्विधम्- उत्पाद्यं, प्राप्यं, विकार्य संस्कार्यञ्चेति। यथा घटं करोतीत्यत्र घट उत्पाद्यः, ग्रामं गच्छतीत्यत्र ग्रामः प्राप्यः, व्रीहीनवहन्तीत्यत्र व्रीहिषु विकार्यत्वम्, व्रीहीन् प्रोक्षतीत्यत्र व्रीहिषु संस्कार्यत्वम्। प्रकृते स्वाध्यायपदवाच्यस्य वेदस्य नित्यत्वात् उत्पाद्यत्वविकार्यत्वयोरभावे आप्यत्वं संस्कार्यत्वं वा स्यात्। अध्ययनञ्च भावार्थाधिकरणन्यायेन भावनायां करणत्वेन अन्वेति। भावार्थाधिकरणञ्च "भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते[3] इति सूत्रेण धात्वर्थ एव फलभावनाकरणत्वेन विधीयते इति निरूपयति। सूत्रस्याक्षरार्थस्तु "भावार्थाः- प्रत्ययेन भावनाप्रतिपादकाः प्रकृत्या कर्मवचनाश्च" "यजेत" "जुहुयात्" इत्यादयो ये, तेभ्य एव क्रिया-कार्यमपूर्व, प्रतीयेत-कल्प्येत। हि-यतः एषः धात्वर्थ एव विधीयते- फलभावनाकरणत्वेन विधीयते। एवञ्च "अध्येतव्य" "इत्यस्यार्थः" अध्ययनेन स्वाध्यायं प्राप्नुयाद् "अध्ययनेन स्वाध्यायं संस्कुर्यादिति" वा स्यात्। तत्राध्ययनेनावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतोऽपुरुषार्थत्वात् फलाकाङ्क्षायाम् किमर्थज्ञानमेव फलमुत स्वर्गादिकमेव फलमिति विशये पूर्वपक्ष एवमुदेति - "स्वाध्यायाध्ययनेन अर्थज्ञानं भावयेदित्यङ्गीकारे विधिर्निरर्थकः स्यात्। "अध्येतव्य" इत्यत्र विधिः श्रूयते, विधित्वस्य च प्रयोजकानि रूपाणि त्रीणि त्रैकालिकाप्राप्तिपाक्षिक-प्राप्तिसमुच्चितप्राप्तय इति। तथाहि- वेदाध्ययनस्यार्थज्ञानार्थत्वे त्रैकालिकाप्राप्तिस्तु नास्त्येव, यतः-विमतं वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनैव सिद्धेः। पाक्षिका-प्राप्तिस्तु वक्तुं शक्यते, अत्राध्ययनं नाम गुरुमुखोच्चारणानूच्चारणम्, अर्थज्ञानस्य तु गुरुमुखाध्ययनेन लिखितपाठेन वा सम्भवात् पक्षे गुरुमुखाध्ययनस्याप्राप्तिः स्यात्, किन्तु सर्वत्र पाक्षिकाप्राप्तेः पूरणाय नियमहेतोः किञ्चिन्नियामकं दृश्यते, यथा यत्र व्रीहीनवहन्तीत्यत्र नखविदलनेनावघातेन वा तण्डुलनिष्पत्तेः सम्भवात् पक्षेऽप्राप्तोऽवघातो विधिना नियम्यते तत्र अवघातनिष्पन्नैरेव तण्डुलैरवान्तरापूर्वद्वारेण दर्शपूर्णमासौ परमापूर्वं जनयतः नान्यथेति दर्शपूर्णमासीयपरमापूर्वं नियामकम्। प्रकृतमध्ययनविधायक वाक्यमनारभ्याधीतमतः प्रकरणं किमपि नियामकं नास्ति। अध्ययनविधेः क्रत्वर्थत्वे श्रुतिलिङ्गादिप्रमाणमपि नास्त्यतः पर्णतावत् क्रत्वर्थत्वं वक्तुं न शक्यते। यतः चतुर्थतृतीये **"यस्य पर्णमयी जुहूर्भवति न स पाप श्लोकं शृणोति"** इत्यत्रानारभ्याधीतस्यापि पर्णमयीत्वस्य वाक्येन क्रत्वर्थत्वं **"द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्याद्"** इत्यत्र स्वीकृतम्, इहाध्ययनविधौ तु तथा जुह्वादिवदव्यभिचरितक्रतु-सम्बन्धाभावाद्वक्तुं न शक्यते। न च विधेः सामर्थ्यदिव गुरुमुखोच्चारणानूच्चारणात्मकाध्ययनस्य क्रत्वर्थत्वं सिद्ध्यतीति वाच्यम्ः एतादृशाध्ययनस्य क्रत्वर्थत्वे सिद्धे क्रत्वर्थे नियमसिद्धिः कत्वर्थत्वेऽध्ययनस्य नियमसिद्धौ अध्ययनस्य क्रत्वर्थत्वस्य सिद्धिरिति परस्पराश्रयापत्तेः। अध्ययनजन्यार्थज्ञानस्य लिखितपाठ-जन्यार्थज्ञानस्य पुस्तकपाठजन्यार्थज्ञानस्य च स्वरूपे भेदाभावात् क्रत्वर्थार्थज्ञानार्थमध्ययनस्य नियमानुपपत्तेः। **"पञ्च पञ्च नखा भक्ष्य"** इत्यादाविव समुच्चितप्राप्त्यभावात् परिसङ्ख्यात्व-मध्ययनविधेरर्थ-ज्ञानार्थत्वे दूरत एव निरस्तं भवति। एवञ्चार्थज्ञानार्थत्वे वेदाध्ययनस्य विधेः वैय्यर्थ्यापत्त्या स्वर्गाद्यदृष्टार्थमध्ययनं विश्वजिन्न्यायेन वक्तव्यमिति सिद्धयति। न च विश्वजिन्न्यायस्त-त्रैवावतरति यत्रार्थवादिकमपि फलं नास्ति, अत्र तु **"यं यं क्रतुमधीते तेन तेनास्येष्टं भवति"** इति क्रतुफलावाप्तिः,[4] यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिवहन्ति यद्यजुराहुतिभिरेव तद्देवांस्तर्पयति ते पितरो देवाश्चैनमध्येतारं तृप्ता आयुरादिभिस्तर्पयन्ती" त्यायुरादिप्राप्तिः, यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्। आहैव स नखाग्रेभ्यः परमं तप्यते तपः।।" इति तपः फलप्राप्तिश्च श्रूयन्ते, अतोऽत्र रात्रिसत्रन्यायः स्यात्, रात्रिसत्रन्यायश्च चतुर्थतृतीयेऽष्टमाधिकरणे विचारितः- **"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति"** इति श्रुतम्। रात्रिशब्देनात्र आयुर्ज्योतिरित्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते। अत्र संशयः-किमत्र पूर्वाधिकरणोक्तविश्वजिन्न्यायेन स्वर्ग एवाधिकारिविशेषणमुत प्रतिष्ठेति। **"सोमापौष्णं त्रैतमालभेत पशुकामः" "प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः"** इत्यादाविव एवंकाम इत्यश्रवणाद् विधिशक्तिलभ्यः स्वर्ग एव विशेषणं स्यात्। यतः सन्देहे वाक्यशेषस्वीकारः, न निश्चिते। निश्चितश्चात्र विधिसामर्थ्यात् सर्वाभिलषितः स्वर्गः अधिकारि-विशेषणमिति । या तु प्रतिष्ठाविषया श्रुतिः अर्थवादरूपा सती क्रतोः प्राशस्त्यमेव औदुम्बराधिकरणन्यायेन प्रतिपादयति इति "क्रतौ फलार्थवादमङ्गवत् काष्णाजिनिः" इति सूत्रेण पूर्वपक्षे प्राप्ते **"फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्" "अङ्गेष स्तुतिः परार्थत्वाद्"**[5] इति सूत्राभ्यां सिद्धान्तितम् अत्र अत्यन्ताश्रुतफल-कल्पनाद्वरं श्रुताया एव प्रतिष्ठाया विपरिणामेन फलत्वकल्पनम्- ये प्रतिष्ठासन्ति त एता रात्रीरुपेयु अर्थात् प्रतिष्ठाकामानामयं रात्रिसत्रयागः इत्येव युक्तम्। "औदुम्बरो यूपो भवति" इत्यत्र तु यूपनिष्ठौदुम्बरत्वस्य क्रतूपकारेण फलाकाङ्खाशान्तेः "ऊर्ज पशूनाप्नोति" इत्यादौ स्तुत्तिसमपर्कत्वमेव युक्तमिति औदुम्बराधि-करणन्यायः, प्रकृते रात्रिसत्रस्थले प्रकारान्तरेण फलाङ्घायाः अशान्तेः विश्वजिन्यायेन स्वर्गफलकल्पने च गौरवादार्थवादिकमपि प्रतिष्ठाफलं रात्रिसत्रस्य फलमिति युक्तम्।

अत एतद्रात्रिसत्रन्यायेन "स्वाध्यायोऽध्येतव्य" इत्यत्रापि आर्थवादिकं 'क्रतुफलावास्यादिकमेव फलं युक्तम्, तदर्थमेव अध्ययनं विधीयत इति वाच्यम्। "यं यं क्रतुमधीते" इत्याद्युक्तार्थवादवाक्यानि जपयज्ञाध्ययन-विषयकाणि, यतः "अहरहः स्वाध्यायमधीयीत" इति विध्यन्तरं श्रूयते, "यं यं क्रतुमधीते" इत्युपक्रम्य नित्यं स्वाध्यायवान् द्विजः इत्युपसंहारश्च दृश्यते। आद्याध्ययने तु "स्वाध्यायोऽध्येतव्य" इति विधेः सन्निधौ न किमप्यार्थवादिकं फलं श्रूयते। तदुक्तं वार्तिके-

**आद्ये त्वध्ययने नैव काचिदस्ति फलश्रुतिः।**
**धारणे जपयज्ञे च या साऽप्येवं निवारिता ।। इति ।।**

फलस्य चातिदेशासम्भवात् **"स्वाध्यायोऽध्येतव्य"** इत्ययं विधिः अश्रुतफलकत्वाद् विश्वजिन्यायेन स्वर्गार्थमेवाध्ययनं विदधाति, तस्य

च मानान्तरेणाप्राप्तत्वाद्विधेः अपूर्वविधित्वं सङ्गच्छते। ये तु जपाद्यध्ययने विहितमार्थवादिकं फलमध्ययनविषयकत्वसाम्येना-द्येऽप्यध्ययने अतिदेशे न कोऽपि दोष इति मन्यन्ते तेषां मते रात्रिसत्रन्यायेन क्रतुफलावाप्त्याद्यार्थ-वादिकफलार्थमेवाध्ययनमिति उभयथापि नार्थज्ञानार्थमध्ययनमनेन विधिना विधीयते इति सम्यक्। न च "स्वाध्यायोऽध्येतव्य" इत्यत्र कर्मकारकगत-फलास्वीकारे कर्माभिधायितव्यप्रत्ययेन कर्मप्रधानो विधिर्नसम्भ-वेदिति वाच्यम्, सक्तन्यायेन **"स्वर्गकामः स्वाध्यायेन अधीयीत"** इति विध्यर्थसम्पत्ती विरोधाभावात्। सक्तुन्यायश्च "सक्तून् जुहोती" ति श्रुतमत्र वाक्ये सक्तूनिति द्वितीयया साध्यत्वं प्रतीयते, परन्तु होमस्य सक्त्वर्थस्य दृष्टद्वाराऽसम्भवात् सम्भवति दृष्टे फलेऽदृष्टफलकल्पनाया अन्यायत्वाद् सक्तूनित्यत्र करवात लक्ष्यते, तथा च वाक्यार्थः सक्तुभिर्हाम भावयेदिति सम्पद्यते। तथा च वार्तिकम्- भूताभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते। सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ताः क्वचित्।। इति।[6]

संस्कारो नाम सत उत्कर्षाधानम्। स च क्वचिदुपयोक्ष्य-माणानामपेक्षितः यथा व्रीहीणां प्रोक्षणादिकम्। क्वचिच्चोपयुक्तानां विहितः यथा भगवतो निर्माल्यस्य गङ्गादौ विसर्जनम्। प्रकृते स्वाध्यायस्य भूतोपयोगविधया भाव्युपयोगविधया वा संस्कार्यत्व-स्यासम्भवात् स्वाध्यायेनाधीयीत इत्येवं विभक्तिव्यत्ययेनैवार्थः स्वीकार्यः। एवञ्च वाक्यार्थः **"स्वर्गकामः घृतकुल्यादिकामो वा स्वाध्यायेनाधीयीत"** इति सम्पद्यते। न च शब्दानामौत्पत्तिक-त्वादर्थपरत्वस्य स्वाध्यायपदवाच्याक्षरराशेरध्ययनस्यापि स्वर्गार्थत्व-मनुपपन्नमिति वाच्यम्; अनन्यपराण्येवाक्षराणि स्वार्थावबोधकतया व्युत्पन्नानि, व्युत्पत्त्यपेक्षश्च शब्दोऽर्थावबोधकः। स्वाध्यायाध्ययनस्य च पूर्वोक्तप्रकारेणार्थपरत्वे विधिवैय्यर्थ्यापत्त्या **"स्वाध्यायोऽध्येतव्य"** इति विधिरेव स्वाध्यायाध्ययनस्य स्वर्गार्थत्वं बोधयन् स्वस्याविवक्षितार्थत्वं द्योतयति । अत एव "अधीत्य स्नायाद्" इति अध्ययनोत्तरकालं समावर्तनविधायकं स्मृतिवचनमपि अध्ययन-मात्रेणैव विध्यर्थस्य शास्त्रार्थस्य परिसमाप्तिं बोधयद् स्वाध्यायस्याविवक्षितार्थत्वं वेदाध्ययनस्य च स्वर्गार्थत्वं दृढयति। एवञ्चाध्ययनस्य स्वर्गार्थत्वे सिद्धे वेदवाक्यार्थविचारोपायभूतन्याय-निबन्धात्मकमीमांसाशास्त्रं विधिप्रयुक्त्या नारम्भणीयम् इति पूर्वपक्षः प्राप्तः। तदुक्तं शास्त्रदीपिकायाम्-

**विनापि विधिना[7] ज्ञानलाभान्नहि तदर्थता ।**

**कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत्।।[8]**

जैमिनीयन्यायमालायाम्- अर्थधीहेतुताधीतेर्लोकसिद्धावघातवत्। नियामकं न चैवातो वैधारम्भो न सम्भवी ।।

अधीतेः- अध्ययनस्य अर्थधीहेतुता अर्थज्ञानहेतुत्वम्, लोकसिद्धा-प्रत्यक्षसिद्धम्। अवघातवन्नियमकं न नियमविधेः स्वीकारेऽवघाते यथा नियामकं दर्शपूर्णमासापूर्ववद् अध्ययननियमाङ्गीकारे नियामकं नास्तीत्यर्थः। वैधारम्भो न संभवी विधिमूलतया पूर्वमीमांसाशा-स्त्रारम्भः न सम्भवतीत्यर्थः।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधौ कर्मणि तव्यप्रत्ययः। तस्य च यथाश्रुतविनियोगो-पपत्तौ सम्भवन्त्यां सक्तुन्यायेन श्रुतविनियोगभङ्गेन "स्वाध्यायेन अधीयीत" इत्यर्थस्वीकारो नोचितः। यत्र च "सक्तून् जुहोतीत्यादौ" सक्तूनां भूतभाव्यु-पयोगरहितत्वात् समीहितसाध्यापेक्षिण्यां भावनायां भाव्यत्वेनान्वयायोग्यत्वात् साधनत्वमेव लक्षणया द्वितीयाभिधत्ते इति स्वीकारः उचितः। प्रकृते तु "स्वाध्यायोऽध्येतव्य" इत्यत्र उत्पाद्यत्वविकार्यत्वाप्यत्वसंस्कार्यत्वाख्य- चतुर्विधकर्मसु नित्यत्वात्स्वाध्यायस्योत्पाद्यत्वविकार्यत्वयोरभावेऽपि आप्यत्वसंस्का-र्यत्वयोः सम्भवात् अध्ययनेन स्वाध्यायं प्राप्नुयाद्, अध्ययनेन स्वाध्यायं संस्कुर्याद् इति वाक्यार्थे सम्भवे "स्वाध्यायेनाधीयीत" इति अन्यथाकरणं न युक्तम्। तत्राध्ययने-नावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतोऽपुरुषार्थत्वात् फलाकाङ्क्षायामधीतवेदजन्यार्थ-ज्ञानस्य क्रत्वर्थत्वेन दृष्टस्य स्वर्गादिसाधनतया फलत्वं युक्तम्। दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात्। एवञ्चार्थज्ञानाय वेदाध्ययनमध्ययनविधिना विधीयत इति सिद्धम्। अत्रायं प्रयोगः श्रीभाट्टचिन्तामणिकारैः प्रदर्शितः- वेदाध्ययनम् इष्टजनकदृष्टार्थकम्; अर्थवद्विषयकविहिताध्ययनत्वात्, अङ्गाध्ययनवत्। व्याकरणा-द्यङ्गानामध्ययनस्य वेदार्थज्ञानार्थत्वं सर्वसम्मतमेव। **"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"** इत्यत्र व्याकरणादीनामध्ययनस्य विधेर्दशनात् तदेकवाक्य-तया **"स्वाध्यायोऽध्येतव्य"** इत्यनेनापि स्वाध्यायपदेन व्याकरणा-दीनामध्ययनमपि विधीयते। अतः अङ्गाध्ययनं दृष्टान्तीकृत्य वेदाध्ययनस्यार्थज्ञानार्थत्वं साध्यते। अत्रानुमानप्रयोगे स्तोभाध्ययने व्यभिचारवारणायार्थवद्विषयकेति साध्ये विशेषणम्। विषमन्त्रा-ध्ययने व्यभिचारवारणाय विहितेति साध्ये विशेषणम्। अतोऽर्थज्ञानमध्ययनविधेयर्भाव्यम्। न चार्थज्ञानार्थत्वे विधित्वप्रयो-जकरूपाभावाद् विधेः वैय्यर्थ्य वाच्यम्; त्रैकालिकाप्राप्तिरूप-प्रयोजकाभावेऽपि पाक्षिकाप्राप्तिरूप-प्रयोजकसत्वात् स्वाध्यायाध्य-यनस्यार्थज्ञानार्थत्वे नियमविधेः सम्भवात्। न च नियामकं नास्तीति वाच्यम्ः क्रत्वपूर्वस्य नियामकत्वात्। तदुक्तम्- जैमिनीयन्याय-मालायाम्-

**दर्शापूर्ववदस्त्यत्र क्रत्वपूर्व नियामकम्।**

**अर्थनिर्णायकं शास्त्रमत आरभ्यतां विधेः ॥[9] इति ।।**

**"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत"** इति विधिनावगम्यमानं दर्शपूर्णमासजन्यं परमापूर्व यथावघातनियमजन्यस्यावान्तरापूर्वस्य कल्पकं तथैवाशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियम-जन्यस्यापूर्वस्य कल्पकं भवति। न चानारभ्याधीतमध्ययनविधायकं वाक्यं श्रुतिलिङ्गादिप्रमाणाभावात्कथं क्रत्वर्थं भवतीति वाच्यम् अर्थात् क्रतुजन्यमपूर्वजातमध्ययननियम- जन्यस्यापूर्वस्य कल्पकं कथमिति न शङ्कनीयम्; अनारभ्याधीतस्यापि अर्थावबोधद्वारा क्रतुनिवर्तनसामर्थ्यरूपलिङ्गात् क्रत्वर्थत्वोपपत्तौ दोषाभावात्। एवञ्च

स्वाध्यायाध्ययनस्य क्रत्वर्थत्वे वाक्यप्रकरणयोरभावेऽपि अध्येतव्य इत्यत्र कल्पनालाघवेन सामर्थ्यलक्षणलिङ्गन चानुगृहीततव्यप्रत्ययः कर्मप्राधान्यमवगमयन् प्रमाणं भवति। तदुक्तं भामतीकारैः- यद्यपि "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविधिर्न किञ्चित्फलवत्कर्मारभ्या-म्नातः, नाप्यव्यभिचरितक्रतुसम्बन्धपदार्थ-गतः, न हि जुह्वादिव-त्स्वाध्यायोऽव्यभिचरितक्रतुसम्बन्धः, तथापि स्वाध्यायस्याध्ययन-संस्कारविधिरध्ययनस्यापेक्षितोपायतामवगमयन् किं पिण्डपितृ-यज्ञवत् स्वर्ग वा सुवर्ण भार्यमितिवदार्थवादिकं वा फलं कल्पयित्वा विनियोगभङ्गेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्पताम्, किं वा परम्परयाप्यन्यतोऽपेक्षितमधिगम्य निर्वृणोत्विति विशये, न दृष्टद्वारेण परम्परयाप्यन्यतोऽपेक्षितप्रतिलम्भे च यथाश्रुतिविनियोगोपपत्तौ च सम्भवन्त्यां श्रुतविनियोगभङ्गेना-ध्ययनादेवाश्रुतादृष्टफलकल्पना नोचिता। दृष्टश्च स्वाध्यायाध्य-यनसंस्कारः। तेन हि पुरुषेण स प्राप्यते, प्राप्तश्च फलवत्कर्मब्रह्मावबोधमभ्युदयनिः श्रेयसप्रयोजन-मुपजनयति, न तु सुवर्णधारणादौ दृष्टद्वारेण किञ्चित् परम्परयाप्यस्त्यपेक्षितं पुरुषस्य, तस्माद्विपरिवृत्य साक्षाद्धारणादेव विनियोगभङ्गेन फलं कल्प्यते।" इति।[10] अयं भावः- पिण्डपितृयज्ञस्तावत् “अमावास्यायामपराले पिण्डपितृयज्ञेन चरन्ती" ति अनारभ्याधीत-वाक्यविहितोऽश्रुतफलः "अमावास्यायामिति" कालकर्मसाधारणा-मावास्यापदघटितः क्रत्वर्थ उत पुरुषार्थ इति सन्देहे "पितृयज्ञः स्वकालत्वादनङ्ग स्यात्" इति सूत्रेण कालकर्मसाधा-रणोऽप्यमावास्याशब्दोऽपराह्नशब्दसमाना-धिकरणः कालपर एवातः कर्मसमभिव्याहाराभावात् पुरुषार्थः विश्वजिन्न्यायेन स्वर्गफलः इति निर्णीतम्। एवञ्च पिण्डपितृयज्ञस्य वाक्यप्रकरणाभ्यां क्रत्वर्थत्वा-सम्भवाद् दृष्टफलस्याप्यभावात् पुरुषार्थत्वं स्वर्गफलकत्वमुक्ते स्वाध्यायाध्ययनस्य तु सम्भवे दृष्टफलेऽदृष्टफलकल्पनाया अन्याय्यत्वादर्थज्ञानार्थत्वं क्रत्वर्थत्वं च सङ्गच्छेत इति विशेषः। सुवर्णधारणमपि "सुवर्णं हिरण्यं भार्यम्, सुवर्ण एव भवति दुर्वर्णोऽस्य भ्रातृव्यो भवति" इत्यनारभ्याधीतेन वाक्येन विहितम्, किं क्रत्वर्थमुत पुरुषार्थमिति सन्देहे "अप्रकरणे तु तद्धर्मस्ततो विशेषात्"[11] "अद्रव्यत्वात् शेषः स्यात्" "वेदसंयोगात्" इति सूत्रैस्त्रिधा सुवर्णधारणं क्रत्वर्थमिति पूर्वपक्षः प्राप्तः। प्रथमपक्षस्तावत्- अप्रकरणे समाम्नातमपि हिरण्यधारणं क्रत्वर्थम्; "सुवर्ण एव भवति" इति वर्तमानापदेशादर्थवादतः फलकल्पनापेक्षया क्लृप्तफलकक्रतूपकार-कत्वाश्रयणस्य ज्यायस्त्वात्। इति। द्वितीय-पक्षस्तु हिरण्यविशिष्ट-धारणस्य वाक्येनात्र विधीयते इति विशिष्टविधाने गौरवात् क्रतुगतहिरण्यानुवादेन धारणाख्यसंस्कार-मात्रं विधीयते इति। तृतीयपक्षस्तु "सुवर्ण हिरण्यं भार्यम्" सुवर्णहिरण्याख्यपदद्वयघटितेन वाक्येन धारणाख्यसंस्कारस्यापूर्वस्य विधानेऽपि गौरवाद् "हिरण्यं हस्ते भवति" इत्येतद्वाक्यविहित-धारणानुवादेन 'सर्वं हिरण्यं रजतम्' इति रजतेऽपि हिरण्यशब्ददर्शनात् तद्व्यावृत्त्यर्थं यद्धिरण्यं भार्यं तत्स्वर्णमिति धार्ये हिरण्ये सुवर्णत्वं विधीयते इति। सर्वथापि भार्यमिति कर्मणि विहितकृत्यप्रत्ययेन भरणस्य हिरण्यलक्षणद्रव्य-प्रधानकत्वावगमात् द्वितीयपक्षे संस्कारत्वेऽध्य-वसितेऽध्वर्युवेद-समाख्याते यजुर्वेदे पठ्य-मानत्वात् लोके क्रयविक्रयादि-व्यवहारगतस्य हिरण्यस्य संस्कार इति वक्तुं न शक्यते, अतः वेदसंयोगात् कुत्वर्थत्वे सत्येव यजुर्वेदसमाख्या अध्वर्युसंयोगं नियमयन्ती अनुगृहीता भवतीति त्रिष्वपि पक्षेषु हिरण्यधारणं क्रत्वर्थमेवेति पूर्वपक्षः प्राप्तः। तदुक्तम्-

**पुरुषार्थत्वपक्षे हि फलं कल्प्यमतः क्रतोः।**
**अङ्ग स्याद् वैदिकत्वेन क्रियात्वेन च साम्यतः॥**[12]

एवं पूर्वपक्षे प्राप्ते सिद्धान्तः- सुवर्णधारणं पुरुषार्थ एवेति **"अप्रकरणे तु तद्धर्मस्ततो विशेषात्"** इति सूत्रेण प्रतिपाद्यते। सूत्रमिदं पूर्वपक्षानुसारेण सिद्धान्तानुसारेण च द्विधा व्याख्यातृभिर्योजितम्। अप्रकरणे आम्नातः तद्धर्मः पुरुषधर्मः एवंजातीयकः; ततो विशेषात् प्रकरणाधीताद्धर्माद्विशिष्यते। न चाहवनीये जुह्वतीति होमानुवा-देनाहवनीयविधानवत् क्रत्वनुवादेन धारणं विहितम्, येन साक्षाद्वाक्येन क्रतुसम्बन्धि भवेत्। नाप्यव्यभिचारिक्रतु-सम्बन्धाश्रय-द्वारा वाक्यात् पर्णमयीवत् क्रतुमुपनिपतेत्; सुवर्णधारणस्य लोकेऽपि विद्यमानत्वेन क्रत्वव्यभिचाराभावात्। अतः सुवर्ण भार्यमित्यत्र विनियोगभङ्गेन **"सूवर्णधारणेन वाक्यशेषगतफलं भावयेत्"** इति रात्रिसत्रन्यायेनार्थवादिकफलाय सुवर्णधारणं विधीयत इति पुरुषार्थमेव सुवर्णधारणम्। न च लाघवाद् येषु क्रतुषु हिरण्यविनियोगः सम्प्रतिपन्नः तेषु तद्वारा धारणस्य निवेशः कल्प्यतामिति वाच्यम्- **"हिरण्यं हस्ते भवति" "हिरण्येन षोडशिनः स्तोत्रमुपाकरोति" "हिरण्यस्त्रज ऋत्विजो भवन्ति"** इत्यादिहिरण्य-विनियोगवत्सु क्रतुषु तद्धारणस्यापि प्राप्तेः। दक्षिणारूपहिरण्य-वत्स्वपि दीयमानस्य प्रतिगृह्यमाणस्य च तस्य धारणप्राप्तेः, हिरण्यार्थतया धारणविधाने सुवर्णश्रुतिवैफल्यापत्तेश्च। एवञ्च सुवर्णधारणस्य श्रुत्यादिप्रमाणाभावेन क्रत्वर्थत्वासम्भवात् अगत्या विनियोगभङ्गेन पुरुषार्थत्वं स्वीकृतम्, स्वाध्यायाध्ययनस्य तु सामर्थ्यादेव क्रत्वर्थत्वे सम्भवति विनियोगभङ्गेन पुरुषार्थत्वं न युक्तम्। एवञ्चार्थज्ञानार्थं वेदाध्ययनं गुरुमुखोच्चारणानूच्चारणात्मकं स्वाध्यायविधिना नियम्यते, नियामकञ्च सकलक्रतुजन्यमपूर्वमतः **“अधीतैरेव वेदैरवगतानि कर्माणि फलदानीति सिद्धम्।”** तदुक्तम्-

**लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना।**
**विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यति ॥**[13] **इति ।।**

एवञ्चार्थज्ञानाय स्वाध्यायः संस्क्रियत इति सिद्धम्। ननु एवं सति अध्ययनस्य स्वाध्यायार्थत्वेऽध्ययनेन स्वाध्यायं भावयेदिति वाक्यार्थः, ततश्च स्वाध्यायस्याध्ययनं प्रति प्रधानत्वोद्देश्यत्वानु-वाद्यत्वानि स्युः, अध्ययनस्य च स्वाध्यायं प्रति गुणत्वविधे-यत्वोपादेयत्वानि स्युः।

पुनः अर्थज्ञानार्थत्वेऽध्ययनेनार्थज्ञानं भावयेदध्ययनञ्च स्वाध्यायेनेति वाक्यार्थः। ततश्च स्वाध्यायस्याध्ययनं प्रत्युपादेयत्वविधेय-त्वगुणत्वानि स्युः, अध्ययनस्य च तं प्रत्युद्देश्यत्वानुवाद्यत्व-प्रधानत्वानि स्युः। तथा चैकस्मिन् स्वाध्यायेऽर्थज्ञानविषय-कोपादेयत्वादित्रिकम्, अध्ययनं प्रति संस्कार्यत्वेनोद्देश्यत्वादि-त्रिकमिति विरुद्धत्रिकद्वयम्। अतः एकस्माद् वाक्यादध्ययनस्य स्वाध्यायसंस्कारार्थमर्थज्ञानार्थत्वञ्च कथं सङ्गच्छेत इति चेद्, अत्रैवं समाधानम्- विरुद्धत्रिकद्वयापत्तेः दूषणतायाः बीजं वाक्यभेद एव। अत्र तु **“अध्ययनसंस्कृतेन स्वाध्यायेनैव फलवत्कर्मोपयिकमर्थज्ञानं भावयेद्”** इति एकयैव वचनव्यक्त्या तत्सिद्धेः वाक्यभेदाभावान्न दोषः। यथा “साम्ना स्तुवीतेति” स्तुतौ विनियुक्तस्यापि साम्नः स्वाभाविकाक्षरसंस्कारत्वं न हीयते तद्द्वारेणैव स्तुतिसाधनत्वात्। न हि तत्रर्चा वाक्यान्तरेण विनियोगोऽस्ति, एकेनैव विधिनोभयार्थत्वस्य सिद्धेः स्वीकारात्। अत एवंजातीयकं स्वभावतः संस्काररूपमपि संस्कार्योद्देशेनावि-धानादुभयार्थकं भवति। एवञ्चाध्ययनस्यार्थ ज्ञानार्थत्वे न कोऽपि दोषः। किञ्च शब्दानां स्वाभाविकार्थ-परत्वस्यापलापस्यासति बाधेऽसम्भवात् स्वाध्यायाध्ययनस्यार्थ-ज्ञानार्थत्वमेव स्वीकार्यम्। किञ्च **‘षडङ्गो वेदोऽध्येयः’ ‘वेदाङ्गानि समस्तानि कृष्णपक्षेषु सम्पठेद्’** इत्यादिस्मृतिभिः साङ्गवेदाध्ययनं विधीयत इति व्याकरणादिरूपाङ्गाध्ययनविधानान्यथानुपपत्त्या वेदाध्ययनस्यार्थज्ञानार्थत्वं सिद्ध्यति। अकिञ्चित्करस्याङ्गत्वायोगात् प्रकृतिप्रत्यय विभागादिभिरर्थावधारणोपायभूतस्य व्याकरणस्य वेदाध्ययनस्वरूपोपकारकत्वासम्भवेन फलोपकारकत्वस्य वक्तव्य-त्वादर्थज्ञानादन्यत्र फले तस्य प्रकृतिप्रत्ययविभागादिदृष्टद्वारेणो-पकारकत्वासम्भवाद् दृष्टस्य व्याकरणादिफलस्य द्वारत्वसम्भ-वेऽदृष्टद्वारा कल्पनायोगाच्च। एवञ्चाङ्गाध्ययनस्यार्थज्ञानपर्यन्तत्वा-त्तन्न्यायेन वेदाध्ययनस्यार्थज्ञानपर्यन्तत्वसिद्धि- र्भवति। ननु-

> **श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि।**
> **युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्।।**
> **अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।**
> **वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु सम्पठेत् ।।**[14]

इत्याद्यध्ययननियमस्मरणमध्ययनस्यार्थज्ञानार्थत्वे नोपपद्यत्वे इति चेत्, न; कार्योपयोगाभावेऽपि विघ्ननिवारणार्थत्वेन स्वरूपोपयो-गित्वात्, नियमापूर्वे उपयोगाच्च न दोषः। न चाध्ययनस्य क्रत्वर्थत्वे “राजा राजसूयेन यजेत” इति राजसूये राज्ञामेवाधिकाराद् ब्राह्मणानामधिकाराभावात् तत्प्रतिपादकानां वाक्यानां ब्राह्मणै-रध्ययनानापत्तेः, ततश्चाध्यापने ब्राह्मणानामेवाधिकारात्तत्प्रति-पादक- वाक्यानामध्ययनाध्यापनपरम्परायां लोपापत्तेः, तत्प्रति-पाद्यक्रतोरपि लोपापत्तिरिति वाच्यम्; ब्रह्मयज्ञजपाद्यर्थं तदध्ययनमिति न दोषः। किञ्च **‘यस्याश्विने शस्यमाने सूर्यो नाभ्युदियादपि सर्वा दाशतयीरनुब्रूयाद्’ “पारिप्लवं शंसति”** इति सर्वेषां स्वाध्यायवाक्यानां क्रतावुपयोगश्रवणाद् राजसूयाद्यखिलार्थ-प्रतिपादकानां वाक्यानां नियमतोऽध्ययनोपपत्तेः अध्ययनाध्यापन-परम्परादिलोपापत्ते- रनवकाशान् न दोषः। एतेन हुंफडादिशब्दा-ध्ययनस्यार्थावबोधपर्यन्तत्वाभावादवश्यमक्षरग्रहणं स्वाधीनोच्चार-णक्षमत्वलक्षणं फलं वाच्यम्, तथाच वैरूप्यपरिहारार्थं सर्वत्र तदेवास्तु अर्थावबोधस्तु तस्य फलम्, न तु विधेरित्यपास्तम्। शब्दानां स्वरसतोऽर्थपरत्वस्याविवक्षायां प्रमाणाभावात् हुंफडादि-शब्दाना-मपि क्रतावुपयोगस्योपदर्शितप्रकारेण सम्भवात् तेषां क्रतावुपयोगस्यार्थज्ञानार्थत्व एवाध्ययनस्यावगमसम्भवाच्च अर्थज्ञाना-र्थत्वमेवाध्ययनमध्ययनविधिना विधीयत इत्येकरूपत्वस्यैव स्वीकाराद् वैरूप्यकल्पनाया अप्रसक्तेः। एवञ्च कर्मविधिषु अध्ययनाविर्भावितैरेव कर्मविधिभिरर्थमवबुध्यानुतिष्ठतां क्रतुफल-भावनासिद्धिः, अर्थवादेषु अध्ययनाविर्भावितार्थवाद- प्ररोचिताः क्रियमाणाः क्रतवः फलमुत्पादयन्ति, मन्त्रेषु पुनरध्ययनपरिगृहीतैरेव मन्त्रैः क्रतुषु पदार्थस्मरणं फलभावनाङ्गमिति सर्वेषां वेदवाक्यामर्थज्ञानार्थमध्ययनं स्वाध्यायविधिना विधीयत इति प्रथमपक्षावलम्बिनां वार्तिककाराणां भामतीकाराणां जैमिनीय-न्यायमालाग्रन्थस्य च पक्षः सुनिरूपितः। एवञ्चास्मिन् मते **“स्वाध्यायोऽध्येतव्य”** इत्यत्र तव्यप्रत्ययस्य व्यापारात्मिका शब्दभावना अध्ययनविषयपुरुषप्रवृत्तिलक्षणार्थभावनारूपभाव्य-निष्ठा स्वगोचरज्ञानकरणिका घृतकुल्याद्यध्ययन- फलार्थवादादि-ज्ञानेतिकर्तव्यताका सती पुरुषप्रवृत्तिलक्षणार्थभावनामध्ययन-करणिकां अर्थज्ञानहेतु- स्वाध्यायरूपभाव्यनिष्ठां प्राङ्मुखत्वादीति-कर्तव्यतामुत्पादयति।

**पाद टिप्पणी**

[1]योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।। मनुस्मृतिः २/१६४ इति वेदानध्ययने प्रत्यवायः स्मर्यते।

[2]तैत्तिरीयारण्यके २/१५

[3]जै.सू.२/१/१

[4]शास्त्रदीपिकायाः टीका मयूखमालिका १.१.१

[5]जै.सू. ४/३/२/१७/९

[6]तन्त्रवार्तिकम्-२.१.४

[7]शास्त्रदीपिका १.१.१

[8]दृष्टलाभाद् इति पाठः जैमिनीयन्यायमालाविस्तरे १.१.१ विवरण-प्रमेयसङ्ग्रहे च प्रथमवर्णके

[9]जै.न्या. १/३

[10]भामती १.३.३४

[11]जै.सू. ४.३.१९

[12]शास्त्रदीपिका- ३.४.१२

[13]शास्त्रदीपिका-१.१.१

[14]मनुस्मृतिः ४.१५